शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
(साहित्य दर्पण सप्तम परिच्छेदः)

असंलक्ष्यक्रमात्मकस्य ध्वन्यात्मनानन्द स्वरूपस्य रसस्य वाक्यार्थेनेतर रसेन कथं परस्पर विरोधः सम्भावनीयः! इति सयुक्तिकं प्रतिपादनम्।

ननु असंलक्ष्यक्रमात्मकस्य ध्वन्यात्मनानन्द स्वरूपस्य रसस्य वाक्यार्थेनेतर रसेन कथं परस्परं विरोधः सम्भावनीयः? एतो हि एकस्मिन् वाक्ये व्यञ्जकता सम्बन्धेन विभेदः (वृत्ति) प्रादुर्भावयोग्यत्वं यदि स्यात्तदैव परस्परोपमर्दकतया विरोधः सम्भवेत्, अथवा अङ्गाङ्गिभावे विरोधः सम्भवेत्। तच्च नास्ति। एकस्मिन् वाक्ये विभेदः प्रादुर्भावयोग्यता प्रभावात्। क्रमेण द्वयोः प्रतीतिः। नाप्यङ्गाङ्गिभावः। द्वयोरपि ध्वनितया स्वातन्त्र्येण विश्रान्तेरिति चेत्। सत्यमुक्तम्। अत एवात्र अनेक रसानामेकत्र वृत्ति विषये प्रधानो हि रसो वाक्यार्थे आकाङ्क्षा पूर्तिं पर्यन्तस्थायी भवति, अप्रधानस्तु वाक्यार्थे आकाङ्क्षा पूर्तिं विनैव विश्रान्तः। तथा च प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्राम राहित्यात् पूर्णरसभाव मात्राप्य विलक्षणतया सञ्चारि रस नाम्ना व्यपदेशः आम्नातः। पूर्णरसोपकारकं सञ्चरणात् सञ्चारि रस इति व्यवह्रियते प्राचीनैः। चण्डीदास पादैस्तु खण्डरस नाम्ना व्यवहारः कृतः। यदाहुः —

'अङ्गं बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे।
नास्वाद्यते समग्रं तत्ततः खण्डरसः स्मृतः॥'

इत्यलम्

उपेन्द्र झा
3/10/18
शास्त्री प्रो० साहित्य
रा० उ० सं० महा०
पुरकैना, हरियाणा

इदानीं द्वितीय खण्डस्य कृते (साहित्यम्)
(साहित्य दर्पणः पञ्चम परिच्छेदः)

अभिधा व्यङ्ग्यार्थं बोधने अक्षमः इति प्रतिपादनम् ।

ननु अभिधा व्यापारेणैव व्यञ्जनाप्रसूत व्यङ्ग्यार्थस्यापि बोधः सम्भवति व्यञ्जनायाः का आवश्यकता इति चेत् ? न । यतोहि सर्व बोधन समर्थया अभिधया व्यङ्ग्यार्थं बोधनम् असम्भवम् । तत्र रसादयः स्वशब्देन शब्देन वाच्यम् । रसादीनां द्विविधं वाच्यत्वं भवितुं अर्हति, विभावादिना रस शब्देन च । तत्र प्रथमः न हि विभावादीनां अभिधानमेव रसाभिधानम्, रसादीनां रस रूपत्वेन अस्वीकारात् । न द्वितीयः । रस शब्देन शृङ्गारादि शब्देन वाऽभिधाने दोष इति सप्तम परिच्छेदे प्रतिपादितत्वात् । अपि च 'स्तोऽयम्', 'सुरतोऽयम्' इत्यादौ स्वशब्देन अभिधानेऽपि न रसप्रतीतिः तस्य स्वप्रकाशानन्द-रूपत्वात् ।

यच्च भट्टलोल्लट प्रभृतयः 'सोऽयमिषोरिव दीर्घदीर्घ-तरोऽभिधा व्यापारः' इत्याहुः । तत्र संकेतितार्थं मात्र बोधनाद् अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानासम्भवात् शब्द बुद्धि कर्मणां विरम्य व्यापाराभावः इति नियमात् ।

यदि च शब्द श्रुतेरनन्तरं भवतयोः लभ्यते तावतामभिधा व्यापारेणैवेति भवान मन्यते चेत्, तर्हि लक्षणा शक्तिरपि किं स्वीकार्या ? दीर्घदीर्घतराभिधा व्यापारेणैव लक्ष्यार्थ ज्ञान सिद्धेः । अतो न लक्षणा शक्तेः आवश्यकता । भाति अन्विताद्धिः किं स्वीक्रियते ।

किञ्च दीर्घदीर्घतराभिधा स्वीकारे ब्राह्मण ! पुत्रस्ते जातः । इति पुत्रोत्पत्ति श्रवणानन्तरम् प्रतीयमानस्य आनन्दस्य मुख प्रफुल्लत्वादि दर्शनेन हर्षः । 'कन्या ते गर्भिणी' इति वाक्य श्रवणानन्तरं प्रतीयमानायाः कन्यायाः व्यभिचार बोधकत्वेन शोकः । इति द्वयोरपि हर्ष शोकयोः किमिति नाभिधया बोधनम् ।

किञ्च —

'बोद्धृ स्वरूप संख्या निमित्त कार्य प्रतीति कालानाम् ।
आश्रय विषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥'

अन्वयः- बोद्धृ स्वरूप संख्या निमित्त कार्य प्रतीति कालाश्रय विषयादीनां भेदात् व्यङ्ग्यः अभिधेयतो वाच्याद् भिन्न इति कारिकार्थः तत्र —

(1) बोद्धृभेदः - वाच्यार्थः पद पदार्थ मात्र ज्ञान निपुणैः वैया-करणैरपि संवेद्यो व्यङ्ग्यार्थस्तु सहृदयैरेवेति बोद्धृभेदः ।

(2) स्वरूपभेदः - 'भ्रम धार्मिक' इत्यादौ 'हे धार्मिक भ्रम' इति वाच्यो विधिरूपो, मा भ्रम इति व्यङ्ग्यस्य निषेधरूपता, 'निःशेषच्युतचन्दनम्' इत्यादौ च 'न पुनस्तस्याधमस्यान्तिकम्' इति वाच्यो निषेधरूपः, 'तस्यान्तिकमेव रन्तुं गतासि' इति व्यङ्ग्यस्य विधिरूपता च स्वरूपभेदः ।

(3) संख्या भेदः - 'गतोऽस्तमर्कः' इत्यादौ 'सूर्यः अस्तं गतः' इत्येक एव वाच्यार्थो प्रतीयते । व्यङ्ग्यार्थस्तु वक्तृबोद्धव्यादिभेदात् क्वचित् 'कान्तमभिसर' इति, 'गावो निरुध्यन्ताम्' इति, 'सन्तापोऽधुना नास्ति' इति, प्रत्यावर्तितुम् 'उपक्रम्यताम्' इति 'दूरं मा गाः' इत्यादि अनेकानेक इति संख्या भेदः ।

(4) निमित्त भेदः - वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः, व्यङ्ग्यार्थस्तु तथाविध प्रतिभा नैर्मल्यादिनेति निमित्त भेदः ।

P.T.O.

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
(साहित्य दर्पण: प्रथम परिच्छेद:)

---

गुणानां रसधर्मत्वात्, रसात्मकस्य काव्यस्य काव्यत्वात् कथं गुणाः काव्यस्योत्कर्ष हेतव! इति विवेचनम् ।

---

ननु यथा निरलङ्कार काव्य अपेक्षया सालङ्कार काव्यस्य उत्कृष्टता न तथा निर्गुण काव्य अपेक्षया सगुण काव्यस्य उत्कृष्टता वक्तुं शक्यते । यतः गुणानां रसैक धर्मत्वात्, निर्गुणानां च नीरसत्वात्, नीरसानां च अकाव्यत्वम् एवेति गुणाः काव्यस्य उत्कर्षकाः इति कथनम् असङ्गतमिति चेत्, न । यद्यपि गुणाः रसस्य धर्माः, रसेन विना न तेषां स्थितिः तथापि अत्र गुणपदं लक्षणया गुणाभिव्यञ्जक शब्दार्थपरम् । अतः 'गुणाः रसोत्कर्ष हेतवः' इत्यस्य तात्पर्यं यत् — 'गुणाभिव्यञ्जकाः शब्दार्थाः रसोत्कर्षकाः' इति । अतः गुण अभिव्यञ्जक शब्द विरहितात् काव्यात् गुणाभिव्यञ्जक शब्द सहितं काव्यम् उत्कृष्टं भवति । इतिदिक् ।

उपेन्द्र झा
3/04/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरसैला, पूर्णियाँ

(5) कार्यभेदः – वाच्यार्थे केवलं वस्तुमात्रं प्रतीयते व्यङ्ग्यार्थे तु वस्तु प्रतीतेन सह चमत्कार उत्पद्यते इत्यनयोः कार्यभेदः ।

(6) प्रतीतिभेदः – वाच्यार्थे प्रतीतिः केवलज्ञानात् पदार्थमात्रबोधन रूपतया व्यङ्ग्यार्थे प्रतीतिस्तु पुनःचमत्कार रूपं बोधं स्वभावतया च प्रतीतिभेदः ।

(7) कालभेदः – पूर्वं हि वाच्यार्थे प्रतीतिः पश्चात् व्यङ्ग्यार्थे प्रतीतिरिति कालभेदः ।

(8) आश्रयभेदः – वाच्यार्थः शब्दाश्रयः व्यङ्ग्यार्थस्तु शब्द शब्दैकदेश-वर्णसङ्घटनाश्रय इत्याश्रय भेदः ।

(9) विषयभेदः – 'कस्य वा न भवति रोषः' इति वाक्ये वाच्यार्थे बोध्ये सखी उद्देश्या 'भ्रमरेणास्या अधरो दष्टो न पुनस्त्वया पतिना' इति व्यङ्ग्यार्थे बोध्ये तत्कान्त उद्देश्यः इति विषयभेदः ।

एवमेभिर्भेद हेतुभिर्वाच्यार्थे व्यङ्ग्यार्थयोर्भेदः सिद्धो भवति । तस्मान्नाभिधेयो व्यङ्ग्य इति सिद्धम् । अलमति विस्तरेण ।

उपेन्द्र शर्मा
31/10/20
एम०ए० प्र० साहित्य
रा० उ० सं० महावि०
ऋषिकेश, प्रथमवर्ष